ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Sanskrit Research Journal

Vol. IX Apr,2016 - Sept,2016 No.1

वर्षम् – ९, अप्रेल २०१६ – सितम्बर २०१६, अङ्कः – प्रथमः

# प्राचीसुधा

# PRACI SUDHA

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

सम्पादकः सञ्चालकश्च

डॉ.विश्वनाथस्वाईँ

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओड़िशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY

PURI, ODISHA

Scanned by CamScanner

# वैदिकवाङ्मये पर्जन्यदेवः

डॉ. शत्रुघ्नपाणिग्राही

असाधारणतया यः अपरेभ्यः ददाति सः देवः कथ्यते । अथवा यः कान्तिमान् द्युतिमान् सः देवः भवति । अतः श्रूयते[१] – "देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा ।" इति । देवः एव देवता । पर्जन्यः वैदिकवाङ्मये सामान्यदेवत्वेन प्रतिपादितः । एषः धनैः सर्वान् प्रीणयति इति ज्ञायते ।[२] शुक्लयजुर्वेदानुसारं प्रतिलोकमेकादशसंख्याकाः देवाः सन्ति[३] । तेषु नद्यः, पृथिवी, अग्निः, सोमो, बृहस्पत्यादश्च पृथिवीस्थानीयदेवाः । इन्द्र, अपानपात्, मातरिश्वा, अहिर्बुध्न्यः, रुद्रः, मरुत्, वायुः, वातः, पर्जन्यः, आपः इत्यादयश्च अन्तरिक्षस्थानीयदेवाः । द्यौः, वरुणः, मित्रः, सूर्यः, सविता, पूषा, विवस्वान्, आदित्यगणः, उषा, आश्विनौ इत्यादयश्च द्युस्थानीयदेवाः । देवानां नामानि स्थानानि च मैक्डोनलमहादयेनापि वैदिकदेवशास्त्रे निर्दिष्टानि ।

वेदेषु पर्जन्यदेवस्य कृते अनेन मन्त्राः श्रूयन्ते । तेषु ऋग्वेदे त्रिष्वेव सूक्तेषु अस्य देवस्य स्तुतिः दृश्यते । अयं मेघाभिमानी देवः भवति । अयं देवः सूर्यमाच्छादयितुं मरुद्देवस्य सहायकरूपेण स्तूयते, यथा –

दिवा चित्तमः कृण्वन्ति पर्ज्यन्येनोदवाहने । यत्पृथिवीं व्युन्दन्ति ।।[४]।

सिंह इव गर्जनं कृत्वा पर्जन्यदेवः वृक्षान् राक्षसाँश्च निहन्ति । अस्य महावधात् सर्वे बिभ्यति । सर्वत्रासौ रेतो नाम जलं दधाति, उर्वरतां च जनयति । अनेन सह वाताः वान्ति, विद्युतश्च विलसन्ति । पर्जन्यः अपां वर्षिता गर्जनशब्दं कुर्वन्, ओषधीषु गर्भस्थानीयम् उदकं स्थापयति, दुष्कृतं हन्ति ।[५] पर्जन्यदेवः पृथिवीम् उदकेन अक्ति येन ओषधयः प्रवर्धन्ते । विश्वमिदं मोदते च ।[६] पर्जन्यदेवस्य आगमनेन जीवाः हर्षोत्फल्लिताः सन्तुष्टाः भवन्ति । न तु केवलं जीवाः पर्जन्यदेवस्योपस्थितिः सूर्यमपि इच्छति ।[७] अतः स्तोता पर्जन्यस्य स्तुतिं कुर्वन् अन्नराशिं भोजनाय प्राप्नोति ।[८] पर्जन्यशब्दो यास्केन बहुधा प्रतिपादितः । पर्जन्यः तृपेः आद्यन्तविपरीतस्य तर्पयिताजन्यः । परोजेता वा, जनयिता वा, प्रार्जयिता रसानामिति[९] । अर्थात् यः जनानां हितसाधनं करोति, यः श्रेष्ठोत्पादकः अस्ति, यः रसानां संग्रहं करोति, सः पर्जन्यः । जन्यात् पृणाति पूर्णान् करोति इति पर्जन्यः । ऋग्वेदस्य एकस्मिन् मन्त्रे समानमेतदुदकम् इति प्रतिपादयित्वा ग्रीष्मकाले यदेव जलं वाष्पीभूतं सन् ऊर्ध्वं गच्छति तदेव जल वर्षाकाले अवामुखम् आगच्छतीति वर्णनं दृश्यते ।[१०] वैदिकसाहित्ये इन्द्राग्निसोमादिदेवैः सह पर्जन्यदेवस्य तुलना भवति ।[११]

Scanned by CamScanner

पर्जन्येन सह वृष्टिमता मरुद्देवः सर्वत्र व्याप्नोति ।[12] ऋग्वेदे पर्जन्यदेवस्य मरुता साकं सहकर्मभावं परिलक्ष्यते ।[13] विद्युता सह पर्जन्यस्य अतिशयसम्बन्धः वर्ततेति प्रतिपादितः ।[14] ऋग्वेदे जीवपुरुषः प्रार्थयति यत् –

अच्छा वद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास ।
कनिक्रदद् वृषभो जीरदानू रेतो दधात्योषधीषु गर्भम् ।।[15]

मन्त्रस्यायमेवार्थो भवति, हे स्तोत! त्वं बलवन्तं शक्तिशालिनं पर्जन्यं देवम् अभिलक्ष्य प्रार्थय । यतो हि स एव पर्जन्यः प्रावृट्काले भूयो भूयो गर्जनां कुर्वन् पादपेषु नवीनचेतनासंस्कारमुत्पाद्य तेषु बीजतत्त्वरूपेण जलाधानं विधत्ते । रेतः (जलम्) एव जीवोत्पत्तौ प्रथमकारणम् । अतः जलसंस्कारविहीने क्षेत्रे बीजवपनस्य वैयर्थ्यम् । शुक्लयजुर्वेदे जगतः पालनार्थम् ओषधयः फलयुक्ताः भवितुं स्तुतिपरकः मन्त्रः दृश्यते ।[16] कुत्रश्चित् पर्जन्यदेवस्य विनाशकरूपस्य वर्णनं प्रतिपादितमस्ति ।[17] अयं पर्जन्य देवः स्वजलजनिताप्लावनैः सर्वान् वृक्षान् धराशायिनः करोति । अपि च सर्वाणि रक्षांसि हन्ति । महाविनाशात् महाप्रलयाच्चापि सम्पूर्णं जगत् बिभेति । यदा अयं पर्जन्यः गर्जनं कुर्वन् दुष्टकर्मकारिणो विनाशयति तदा विनाशे दुष्टैः सह सज्जना अपि विनाशं भलन्त इति न्यायेन निरपराधः निष्पापोऽपि जनः अस्माद् शक्तिमतः वर्षणशीलाद् वा पर्जन्यात् भीतः पलायते ।[18] जलवृष्टिः पर्जन्यस्य मुख्यं कर्म विद्यते इति ऋग्वेदे श्रूयते –

रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान् कृणुते वर्ष्याँ ३ अह ।
दूरात्सिंहस्य स्तनथा उदीरते यत्पर्जन्यः कृणुते वर्ष्यं१ नभः ।।[19]

अयं पर्जन्यदेवः वर्षर्तौ यथा रथस्वामी रथ्यान् कशयाऽग्रे गमनाय प्रेरयति तथैव मन्ये तत्स्थानीयया विद्युत्कशया पर्जन्याधिष्ठातृदेवोऽपि जलवर्षणशीलात् दूतस्थानीयान् मेघान् आकाशे आविष्करोति । यदा सः पर्जन्यदेवः मेघान् नभस्याविष्करोति तदा अन्तरिक्षात् वारं वारं सिंहस्वेव गर्जनं श्रूयते । अस्यामृचि उपमालङ्कारस्य प्रयोगः वर्तते । कशया विद्युता सह, अश्वस्य मेघेन सह, रथस्वामिनः प्रतिपादितमस्ति । तस्मात् देवात् सुखप्राप्त्यर्थं निम्नोक्तरूपेण प्रार्थनायाः निरूपणं दृश्यते । यस्य पर्जन्यदेवस्य अनुशासने पृथिव्यपि अत्यधिकं नमति, तस्य च अनुशासने सर्वविधाः पशवः वनस्पतयश्च वर्तन्ते, तादृक् त्वं हे पर्जन्य! अस्मभ्यं महत्सुखं प्रयच्छ ।[20] स्वकर्मणा नानाभोग्यपदार्थानुत्पाद्य अस्मभ्यं सुखं दोहीति प्रार्थनां जीवपुरुषाः कुर्वन्ति ।[21] हे मरुदेव! त्वं स्ववेगेन अन्तरिक्षलोकाद् वृष्टिमानीय अस्मभ्यं यच्छ । वर्षणशीलानां मेघानां जलधाराश्च लोके प्रकर्षेण क्षर । हे पर्जन्यदेव! त्वम् एतेन गर्जनशीलेन मेघेन सह अस्मदभिमुखम् आगच्छ । यतोहि

Scanned by CamScanner

त्वमेवास्माकं जलमाध्यमेन पितृतुल्यो पालकोऽसि ।[२२] अपि च पर्जन्यः सोमदेवस्य जनकः इति प्रतिपादितः वर्तते ।[२३]

ऋषिः एकस्मिन् मन्त्रे पर्जन्यं प्रार्थयति हे पर्जन्यदेव! त्वं भूमिमभिलक्ष्य गर्जनां कुरु, वर्षणसङ्केताब्दञ्चापि सर्वजनाश्वासनाय ब्रूहि । सर्वेषु पादपेषु रसाधानरूपं गर्भमुपस्थापय, जलवतारथेन परितो हि परिभ्र विमुक्तबन्धनं तिर्यग् वाऽधोमुखं वा जलावृतं मेघं पृथिव्यां सुखेन आनय, येन क्वचिच्छुष्कक्षेत्रं, क्वचिच्चार्द्रं क्षेत्रं, निम्नोन्नतप्रदेशो वा कृषिक्षेत्रं समानरूपेण जलं प्राप्नुयात् अथवा जलवर्षणवेगेन उन्नतप्रदेशात् मृत्तिकाक्षरणमाध्यमेन विषमाऽपि भूमिः समा भवेत् ।[२४] पर्जन्यः स्तूयते यत् तस्य कार्येण सर्वत्र नद्यः प्रवहन्तु, सर्वत्र गवां कृते जलानि सुलभानि भवन्तु । श्रूयते यथा –

महान्तं कोशमुदचा निषिञ्च स्यन्दन्तां कुल्या विषिताः पुरस्तात् ।
घृतेन द्यावापृथिवी व्युन्धि सुप्रपाणं भवत्वघ्न्याभ्यः ।।[२५]

हे पर्जन्यदेव! त्वम् महान्तं जलकोशं मेघम् उन्नतं विधाय तच्च पुनः निम्नाभिमुखं कुरु येन सर्वत्र समानरूपेण कृषकाणां कृषिकार्यार्थं कृषिक्षेत्रं सेचनं जायेत । तव जलवर्षणाधिक्येन नद्यः पूर्णतां प्राप्य सर्वत्रैवाभिमुखं प्रवहन्तु । त्वं स्वजलधाराभिः द्युलोकमाकाशञ्च समानरूपेण पूरयित्वा सर्वं सांसारिकक्षेत्रं विविधरूपेण आर्द्रं कुरु । येन सर्वत्र गावः पानार्थं जलं लभन्ताम् ।

यज्ञकर्मणि चत्वारः ऋत्विजः भवन्ति । तत्र उद्गातानामकः ऋत्विक् सामगानेन देवान् आह्वयति । अन्यदेववत् पर्जन्यदेवस्य कृतेऽपि स्तोता सामगायतीति दृश्यते ऋग्वेदे ।[२६] तस्य कृतेऽपि हविप्रदानं विधीयते ।[२७] सर्वेषां देवानामावाहकरूपः अग्निरपि मेघवर्षणार्थं पर्जन्यदेवस्य आवाहनं करोति ।[२८] ऋग्वेदे पर्जन्यदेवं प्रार्थयित्वा वदति जीवपुरुषः, हे पर्जन्यदेव! यदा वर्षर्तौ त्वमत्युच्चैः शब्दैः गर्जनां कुर्वन् सर्वान् जलावरोधभूतान् दुष्टान् दुष्कर्माणः नाशयति तदैव तवजलमवाप्य जगतः सर्वे जीवाः जन्तवः पादपाश्च मोदन्ते ।[२९] यथा इन्द्रदेवः बलेन महानः तथैव वृष्ट्या महानः पर्जन्यदेवः । श्रूयते यथा –

महां इन्द्रो य ओजसा पर्जन्या वृष्टिमां इव । सोमैर्बत्सस्य बावृधे ।।[३०]

ऋग्वेदे जलवृष्ट्यनन्तरं सन्तोषभावं प्रकटयन् ऋषिः कथयति हे पर्जन्यदेव! इदानीं त्वं जलवृष्टिं विधाय पूरितधर्माऽसि, यतोहि त्वं मरुस्थलानि जलैराप्लावितानि, तथापि पारं गन्तुमर्हाणि कृतवानसि, तदर्थञ्च यजमानानां स्तुतिमपि प्राप्तवानसि, तस्मात् स्वकीयां जलवृष्टिं शीघ्रमेवावहरातिवृष्टिजनितजनासौविध्यापहरणायेति कुरु इति भावः ।[३१]

Scanned by CamScanner

अतः निष्कर्षरूपेण वक्तुं शक्यते पर्जन्यदेवः जीवजगतः कल्याणं करोति । तस्य स्तुतिसमये एतत् ज्ञायते यत् सः कुत्रचित् सर्वव्यापकरूपेण, मरुद्देवस्य सहायकरूपेण, सृष्टेः पालकरूपेण, वनस्पतीनां कृते सरप्रदायकरूपेण, सर्वेषां जीवानां जनकरूपेण, मनुष्याणां कृते धनदाता-अन्नदाता-सुखदातारूपेण वर्तते । आचार्ययास्कः इन्द्रं विद्युद्रूपेण प्रतिपाद्य वृत्ररूपं पर्जन्यं वज्रेणं विदारयति । अतः पर्जन्यदेवस्य सम्बन्धः विद्युता साकं विद्यते विद्वांसः कथयन्ति । परन्तु मन्त्रद्रष्टा ऋषयः जगतकल्याणार्थं पर्जन्यदेवं प्रार्थयित्वा निवेदयन्ति मन्त्राशः "शं नः पर्जन्यो भवतु प्रजाभ्यः"[३२] इति शम् ।।

---

सन्दर्भसूची –


१. निरुक्ते – ७/४ ।

२. ऋग्वेदे – ८/२१/१८, १०/६६/६ ।

३. ये देवासो देवादिव्येकादश स्थ पृथिव्यामध्येकादशस्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ।। इति ।
शुक्लयजुर्वेदे –७/११ ।

४. ऋग्वेदे – १/३८/९ ।

५. अथर्ववेदे – ६/३८/३ ।

६. प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः ।
इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति ।। ऋग्वेदे – ५/८३/४।

७. अथर्ववेदे – ४/१५/६ ।

८. ऋग्वेदे – ६/५०/२, अथर्ववेदे – १२/१/४२ ।

९. निरुक्ते – १०/१० ।

१०. ऋग्वेदे – १/१६४/५१ ।

११. तत्रैव – ८/६/१, ८/१०२/५, ९/२/९ ।

१२. दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः ।
अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ।। इति । तत्रैव – ५/८३/६।

१३. तत्रैव – ५/५३/६ ।

१४. अथर्ववेदे – १०/१०/७ ।

१५. ऋग्वेदे – ५/८३/१

१६. निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम् । इति ।
शुक्लयजुर्वेदे – २२/२२ ।

१७. ऋग्वेदे – ६/७५/१५ ।


Scanned by CamScanner

१८. वि वृक्षान् हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात् ।
उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः ।। इति ।
तत्रैव – ५/८३/२ ।

१९. तत्रैव – ५/८३/३ ।

२०. यस्य व्रते पृथिवी नन्नमीति यस्य व्रते शफवज्जर्भुरीति ।
यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ।। तत्रैव – ५/८३/५।

२१. तत्रैव – ७/३५/१० ।

२२. विद्मा शरस्य पितरं पर्जन्यं भूरिधायसम् । अथर्ववेदः – १/२/१, १/३/१,
८/७/२१, १२/१/१२ ।

२३. ऋग्वेदे – ९/८२/३ ।

२४. अभि क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन ।
दृतिं सु कर्ष विषितं न्यञ्चं समा भवन्तूद्वतो निपादाः ।। तत्रैव – ५/८३/७ ।

२५. तत्रैव – ५/८३/८ ।

२६. पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे । तत्रैव – ७/१०२/१ ।

२७. शुक्लयजुर्वेदे – २४/६, २४/२१ ।

२८. ऋग्वेदे – १०/९८/८ ।

२९. यत्पर्जन्य कनिक्रदत् स्तनयन् हंसि दुष्कृतः ।
प्रतीदं विश्वं मोदते यत् किं च पृथिव्यामधि ।। तत्रैव – ५/८३/९ ।

३०. अथर्ववेदे – २०/१३८/१ ।

३१. अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उ ।
अजीजन ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषाम् ।। ऋग्वेदे –५/८०/१०।

३२. अथर्ववेदे – १९/१०/१० ।

—o—

Scanned by CamScanner